असज्जातिः (सवेदनं)—

दलति हृदयमेतत् मोहमभ्येति चेतः
स्फुटति सकलदेहे कीकसग्रन्थिसन्धिः।
विरम विरम शिल्पान्मूलनाश त्वमस्मात्
शिव शिव शिव सद्यो जीवितं त्रुट्यतीव ॥

(इति मोहमुपगतः)

———

परिशिष्ट

धूर्तसमागम-प्रहसनम्

ज्योतिरीश्वर

॥ अथ धूर्तसमागमः ॥

॥ प्रस्तावना ॥

हर्षादम्भोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमत्या
शश्वन्मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्ब्यमाने ।
तद्वक्त्रं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चन्द्रः सहासः
दृष्ट्वा तद्वक्त्रमाशु स्मितसुभगमुखः पातु वः पंचवक्त्रः ॥

अपि च ॥

वक्त्राम्भोरुहि विस्मिताः स्तबकिता वक्षोरुहि स्फारिताः
श्रोणीसीमनि गुम्फिताश्चरणयोरक्ष्णोः पुनर्विस्तृताः ।
पार्वत्याः प्रतिगात्रचित्रगतयस्तन्वन्तु भद्राणि वो
विद्धस्यान्तिकपुष्पसायकशरैरीशस्य दृग्भक्तयः ॥

नान्द्यन्ते सूत्रधारः ॥

यदद्य

नानायोधनिरुद्धनिर्जितसुरत्राणत्रसद्वाहिनी-
नृत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद्भूधरः ॥

अस्ति श्रीनरसिंहदेवनृपतिः कर्णाटचूडामणिर्-
दृप्यत्पार्थिवसार्थमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥

तस्योद्युक्तभुजप्रतापदहनज्वालानिरस्तापदो
राज्ञः सर्वगुणानुवादपदवीविद्योतनाचार्यकः ।
यो धीरेश्वरवंशमौलिमुकुटो दातावदाताशयस्-
तस्य श्रीकविशेखरस्य कविता मच्चित्तमालम्बते ॥

तदनेन सकलसंगीतविशेषविद्योतनाभिनवभरतेन पुरमथनपदारविन्दद्वन्द्ववन्दारुकरपल्लवेन निखिलभाषोपभाषाशुभभावुकसरस्वतीकण्ठाभरणेन अनवरतसोमरसास्वादकषायकण्ठकन्दलीनरीनृत्यमानमीमांसामहोत्सवेन रामेश्वरस्य पौत्रेण तत्रभवतः पवित्रकीर्तेर्धीरेश्वरस्यात्मजेन महाशासनश्रेणिशिखरग्रामतपल्लीजन्मभूमिना कविशेखराचार्यज्योतिरीश्वरेण निजकुतूहलविरचितं धूर्तसमागमनाम प्रहसनमभिनेतुमादिष्टोऽस्मि । तस्य चादिष्टमवश्यमिष्टं मालतीमालेव मया शिरोधरणीयं ॥ तथा हि—

कर्पूरन्ति सुधाद्रवन्ति कमलाहासन्ति हंसन्ति च
प्रालेयन्ति हिमालयन्ति करकामारन्ति हारन्ति च ।

त्रैलोक्यांगणरंगलङ्घिमगतिप्रागल्भ्यसंभाविताः
शीतांशोः किरणच्छटा इव जयन्त्येतर्हि तत्कीर्तयः ॥

अपि च—

के नार्चिता दिविषदः कति न द्विजेशाः
संतर्पिता न कवयः कति पूजिता वा ।
के चार्थिनः प्रतिदिनं न कृताः कृतार्था-
स्त्यागप्रसादपटुना कविशेखरेण ॥

तत् प्रेयसीमाहूय संगीतकमवतरामि ।

नेपथ्याभिमुखमवलोक्य

आर्ये इतस्तावत् ।

॥ प्रविश्य नटी ॥

अज्ज एसम्हि । आणवेदु अज्जो । को णिओओ पसाई-करीअदुत्ति ॥[1]

॥ सूत्रधारः ॥

आर्ये अपि न जानासि ?

यश्चत्वारि शतानि बन्धघटनालङ्कारभाञ्जि द्रुतं
श्लोकानां विदधाति कौतुकवशादेकाहमात्रे कविः ।

[1] आर्ये एषास्मि । आज्ञापयत्वार्यः । को नियोगः प्रसादीक्रियतां इति ।

ख्यातः क्ष्मातलमण्डलेष्वपि चतुःषष्टेः कलाया निधिः
संगीतागमसागरो विजयते श्रीज्योतिरीशः कृती ॥

तद्विरचितं धूर्तसमागमनाम प्रहसनमभिनेतुमारब्धमिति गीयतां नाट्योचितं किंचित् ॥

॥ नटी ॥ सविनयं

आणवेदु अज्जो को एत्थ पबन्धे पहाणो रसो जं उद्दिसिअ गाइस्सं ।[1]

॥ सूत्रधारः ॥

ननु प्रोत्फुल्लमालतीमकरन्दसान्द्रामोदमत्तमधुकरझङ्कारमुखरो वसन्तः संततो ज्जृम्भितानङ्गशृंगार एव । तथा हि

विकसितनवमल्लीकुञ्जगुञ्जद्द्विरेफः
कुसुमितसहकारश्रेणिनिर्यत्परागः ।
प्रमुदितपिककण्ठप्रोच्छलन्मञ्जुलश्रीर्-
अपहरति मुनेरप्येष चेतो वसन्तः ॥

॥ नटी ॥

मलआणिल चालिअचूअवणो
कलकण्ठिमराहिदकामिअणो ।

[1] आज्ञापयत्वार्यः कोऽस्मिन् प्रबन्धे प्रधानरसो यमुद्दिश्य गास्यामि ।

मअरन्दविमत्तसिलीमुहओ
सुरहीकिदसव्वदिसामुहओ ॥

एसो वसन्तमासो मुणिअणसत्थस्स राअरहिदस्स ।
उम्मूलिअ गरुधीरं करेइ वम्महवसं हिअअं ॥[1]

इति । गीयते नेपथ्ये

दण्डकमण्डलुमण्डितहस्तः
सुललिततिलकविभूषितमस्तः ।
अयमुपसर्पति जंगमलोभश्-
चलकाषायपटार्पितशोभः ॥

अज्ज को एसो परिक्खलन्तणिद्धोअकसाअवसणो दण्ड-
कुण्डिअहत्थो धुत्तो विअ इदो तदो विलोएन्तो दीसदि ॥[2]

---

[1]मलयानिलचालितचूतवनः । कलकण्ठस्वराहृतकामिजनः ।
मकरन्दविमत्तशिलीमुखकः । सुरभीकृतसर्वदिशामुखकः ।
एष वसन्तमासो मुनिजनसार्थस्य रागरहितस्य ।
उन्मूल्य गुरु धैर्यं करोति मन्मथवशं हृदयं ॥

[2]आर्य क एष परिस्खलन्निर्धौतकषायवसनो दण्डकुण्डिकाहस्तो धूर्त इव इतस्ततो विलोकयन् दृश्यते ॥

॥ सूत्रधारः ॥

आर्ये ।

यः श्रूयते जनमुखात् तुरगक्रियावान्
आचारधर्मरहितो गणिकाविलासी ।
दीर्घोर्द्ध्वपुण्ड्रककमण्डलुदण्डलक्ष्यः
पुष्णाति विश्वनगरः किल दम्भमुग्रं ॥

तदेतस्य दर्शनं दूरत एवाहरणीयं ॥

इति निष्क्रान्तो

॥ इति प्रस्तावना ॥

॥ प्रथमोङ्कः ॥

ततः प्रविशति यथानिर्दिष्टः स्नातकेनानुगम्यमानो विश्वनगरः ॥

॥ विश्वनगरः ॥ ॥ सनिर्वेदः ।

हृदयकमलमध्ये निर्गुणो निष्प्रपञ्चस्
त्रिभुवनपतिरेको ध्यायते योगिभिर्यः ।
तमहमजरमाद्यं ज्ञानमात्रैकवेद्यं
मधुमथनमुदारं संततं चिन्तयामि ॥

॥ स्नातकः ॥ समन्तादवलोक्य स्वगतं

[1]अहो रमणीअदा वसन्तस्स । जदो
उम्मीलन्तं पसूणं रइरसकुसला छप्पदा वम्महन्धा
कन्तारङ्गाणुरत्ता महुरसभविअं साणुराअं पिबन्ति ।

---

[1]अहो रमणीयता वसन्तस्य यतः—
उन्मीलत् प्रसूनं रतिरसकुशला षट्पदा मन्मथान्धाः
कान्तारङ्गानुरक्ता मधुरसभवितं सानुरागं पिबन्ति ।
उद्गायन्ति स्फुरन्तस्त्रिभुवनजयिनः कामरागस्य कीर्तिं
संवित्तिं हारयन्तः प्रियजनविरहे कोकिलाः कामिनीनां ॥

उग्गाअन्ति प्फुरन्ता तिहुअणजइणो कामराअस्सकित्तिं
संवित्तिं हारअन्ता पिअअणविरहे कोइलाकामिणीणं ॥

अवि अ ।[1]

जे कप्पूरं हरन्ता कमलवणसिरिं लोलअन्ता सहावं ।
साहाओ कम्पअन्ता णिहुअणसुहआ चन्दणाणं वणाणं ।
ते कन्दप्पस्स मित्ता रइतणुरमणी केलिदप्पं कुणान्ता ।
तेल्लोअं मोहन्ता मलअसिहरिणो सीअला वान्ति वाआ ।
त कधं एसो अइदूसहो वसन्तसमओ मए एक्कसरीरेण सहिदव्वो ॥

इति वैमनस्यं नाटयति

॥ विश्वनगरः ॥ स्नातकं निर्वर्ण्य

अये दुराचार कथमद्य चिन्ताभारनतकन्धरोऽन्यादृश इव दृश्यसे । तथा हि

---

[1]अपि च । ये कर्पूरं हरन्तः कमलवनश्रियं लोडयन्तः सभावं । शाखाः कम्पयन्तो निधुवनसुखदाश्चन्दनानां वनानां । ते कन्दर्पस्य मित्राणि रतितनुरमणीकेलिदर्पं कुर्वाणन्तस् । त्रैलोक्यं मोहयन्तो मलयशिखरिणः शीतला वान्ति वाताः ॥ तत् कथं एष अतिदुःसहो वसन्तसमयो मया एकशरीरेण सोढव्यः ॥

निःश्वासे पीवरत्वं वपुषि सुतनुता शून्यता दृष्टिपाते।
वक्त्रेन्दौ धूसरत्वं गतिषु विधुरता चेतसि म्लानता च।
चेष्टा नैवेक्ष्यते ते यदधिकविकलं रूपमासादितस्त्वं।
तन्मन्ये पञ्चबाणस्तिरयति भवतो धीरतां पूर्वरूपां ॥

॥ स्नातकः ॥ सलज्जमधोमुखः स्थित्वा

[1]भअवं अदिलज्जाकर क्खु एदं। ता ण जुत्तं तुम्ह पुरदो पआसिदुं

॥ विश्वनगरः ॥

न दोषः स्वरूपाख्याने। तत् कथ्यतां॥

॥ स्नातकः ॥ सप्रणय

[2]भअंवं अज्ज मए महापहादे णअरपोक्खरिणीपरिसरे

[1]भगवन्नतिलज्जाकरं खलु एतत्। तन्न युक्तं युष्माकं पुरतः प्रकाशयितुं।

[2]भगवन्नद्य मया महाप्रभाते नगरपुष्करिणीपरिसरे उपहसितसुरनागरी-ऽपसम्पत्तिरनङ्गसेना नाम वारविलासिनी विलोकिता। ततः प्रभृति सर्वगतां तामेव प्रेक्षे।

उवहसिदसुरणाअरीरूवसंपत्ती अणङ्गसेणा णाम वारविलासिणी विलोइदा । तदो पहुदि सव्वगदं तं ज्जेव पेक्खामि ॥

॥ विश्वनगरः ॥ सहस्ततालमुच्चैर्विहस्यं

वत्स अद्य मयापि तत्रैव सुरतप्रिया नाम मासोपवासिनी दृष्टा । तामनुसंदधानोऽहमपि मर्मभेदिना कामबाणेन संदलित एव । तथा हि

आकाशे लिखितेव दिक्षु खचितेवाकीर्णरूपेव च
दृक्पद्मप्रतिबिम्बितेव मनसि श्लिष्टेव बद्धेव च ।
सा मच्चित्तसरोरुहे मधुकरीवात्यन्तभावोत्तरा
कान्ता कान्तावलासवासवमतिः क्वास्तीति न ज्ञायते ॥

ऊर्द्ध्वमवलोक्य

वत्स मध्याह्नमारूढो भगवान् सहस्रांशुः । तथा हि

दिक्चक्रं मृगतृष्णया कवलितं व्योमापि भास्वत्कर-
छायाभिश्छुरितं तुषानलकणप्रायाश्च भूरेणवः ।
पान्थाः पल्वलसंकुलद्रुमलताकुञ्जोदरे शेरते
मज्जत्कुञ्जरपानलोहितजलाः क्षुभ्यति तोयाशयाः ॥

तद्भिक्षाकरणार्थमत्रैव कमपि गृहमेधिनमनुसराव ॥

इति पराक्रमतः

॥ स्नातकः ॥ अग्रतोवलोक्य

[1] भो भअवं पेक्ख पेक्ख विहिदभअवन्तजणमुण्डसरिच्छ-बहुअरमहिसीखम्भसोहन्तचउस्सालं इदोतदोसंचरन्तबालगोच्छ-सोहिदं . पीणुत्तुङ्गत्थणालमपरिक्खलन्तमन्दसंचाररमणिज्जा-वासपरिसरसंचरन्तचेलिआसमूहं कस्स बि महाधणस्स वासभअणं विलोईअदि ।

[2] भो भो णाअरा कस्स इदं वासभअणं ॥

इति पठति । नेपथ्ये

लक्ष्मीविवर्तरसविघ्नतसर्वभोगः ।
शश्वत्प्रकीर्णधनचिन्तिनवीतनिद्रः ।

[1] भो भगवन् प्रेक्षस्व प्रेक्षस्व विहितभगवज्जनमुण्डसदृशबहुतरमहिषीस्तम्भ-शोभमानचतुःशालं इतस्ततः संचरद्बालगोवत्सशोभितं पीनोत्तुङ्गस्तनालसपरिस्ख-लन्मन्दसञ्चाररमणीयावासपरिसरसञ्चरच्चेटिकासमूहं कस्यापि महाधनस्य वास-भवनं विलोक्यते ॥

[2] भो भो नागराः कस्यैदं वासभवनं ।

अग्राह्यनामकतया भुवि यः प्रसिद्धस्
तस्यैतदाश्रमपदं पुरतो विभाति ॥

॥ स्नातकः ॥ अग्रतो गत्वा पुनः

भो भो णाअरा कस्स इदं वासभअणं

इति पठति । पुनर्नेपथ्ये लक्ष्मीत्यादि

॥ विश्वनगरः ॥

आः क एष नामग्रहणे भवतो निर्बन्धः । अथवा यद्वा तद्वास्तु श्रूयतां । मृताङ्गारठक्कुरस्याश्रमोयं । वत्स अलं विलम्बेन । वासाभ्यन्तरं प्रविशाव ॥

इत्यावासप्रवेशं नाटयित्वा एकान्ते स्थितौ । ततः प्रविशति कश्मलवेशो मृताङ्गारः

॥ मृताङ्गारः ॥

व्ययशीलः कुवेरोपि कामं याति दरिद्रतां ।
अपि प्राणाः प्रदातव्या नार्थिभ्यो धनिकैर्धनं ॥

॥ स्नातक. ॥ उपसृत्य

[1]भो महाबह्मण भअवन्तोविस्सणअरचरण। तुम्हाण गेहे भिक्खं भुञ्जिदुं इछन्ति ॥

। मृताङ्गार: ॥ स्वगतं

अहो, दुर्दैवमस्माकं यदेतान् सकलनगरीयाद्यलोकान् विहा मय्येव पतितो धूमकेतुः तत् कः प्रतीकारोद्य भविष्यति ॥

इति विचिन्त्य तावत् प्रकाश। सविनय

स्थाने यस्य चरन्ति भैक्ष्यमनघाः स्नेहेन युष्मादृशः
स स्यादच्युतमूर्तिसेवनवशाद्धन्यः पवित्रालयः ।
किंत्वस्मत्प्रतिवेशिविप्रवनिता भ्रातृप्रमक्ताङ्गना।
दूती प्रमवेति सतकमतः स्थानान्तरं गम्यतां ॥

॥ विश्वनगर: ॥ स्वगत

अहो दुरात्मनोस्य व्याजव्यवहारः । भवतु वा । तत् प्रबोधयामि ।

---

[1]भो महाब्राह्मण भगवन्तो विश्वनगरचरणा युष्माकं गेहे भिक्षां भोक्तु मिच्छन्ति ॥

प्रकाशं

आयुष्मन् यतीनामस्माकं कुतः सूतकदोषः । तथा च स्मृतिः

न वायुः स्पर्शदोषेण नाग्निर्दहनकर्मणा ।
नापो मूत्रपुरीषाभ्यां नान्नदोषेण मस्करी ॥

॥ मृताङ्गारः ॥ सविनयं

भगवन् यद्यप्येवं तथापि न संभवति । पश्य

अनावृष्ट्या कृषिर्नष्टा राष्ट्रभङ्गाद्दणादिकं ।
वाणिज्यमल्पलाभेन प्रातराशस्य का कथा ॥

॥ स्नातकः ॥ सक्रोधं संस्कृतमाश्रित्य

धिङ् मौर्ख्यं जलधिसुतायाः श्रियः

नो जानाति कुलीनमुत्तमगुणं सत्वान्वितं धार्मिकं
नाचारप्रवणं न कार्यकुशलं न प्रज्ञयालंकृतं ।
नीचं क्रूरमपेतसत्त्वहृदयं यस्मादियं सेवते
तत् त्वं सानुगुणः पयोधिसुतया लक्ष्म्या प्रमाणीकृतः ॥

[1]अरे णट्ठपरलोअ दुट्ठबह्मणा ईदिसे दूसह मज्झण्हे पठमं

---

[1]अरे नष्टपरलोक दुष्टब्राह्मण ईदृशे दुःसहमध्यान्हे प्रथमं त्वां महावनं भिच्चित्वा कुतोऽन्यतो गत्वा अस्माभिर्भिक्षा ।

तुमं महाधणं भेक्खिअ कुदो अण्णदो गदुअ अम्हेहिं भिक्खा पत्थिदव्वा ।

॥ मृताङ्गारः ॥

भगवन्नस्मदावासोत्तरं सुरतप्रिया नाम मासोपवासिनी प्रतिवसति । तत्र गम्यतां ॥

इत्यभिधाय सत्वरं परिक्रान्तः

॥ विश्वनगरः ॥

यद्येवं ततः समीहितमेव नः सपन्न । तदेहि तत्रैव गच्छाव ॥

इति परिक्रामतः ॥ स्नातकः ॥ पुरोवलोक्य गन्धमाघ्राय

भअवं पेक्ख पेक्ख एकाङ्गिआमुत्थमेत्थिआसंजुत्तमहा-हन्दकुट्ठपरिमलुग्गारो अग्गिमभवणादोणं सेवदि । ता एदं ज्जेव सुरतप्पिआए वासभवणं ॥

---

[1] भगवन् प्रेक्षस्व प्रेक्षस्व एकाङ्गिकामुस्तमात्रिकासंयुक्तमहाकन्दकुष्ठ-परिमलोद्गारोऽग्रिमभवनादेनां सेवते । तदेतदेव सुरतप्रियाया वासभवनं ॥

॥ विश्वनगरः ॥

विदग्धैव किल भार्गोपगामिनीति किंवदन्ती । तदागच्छो-
पसर्पात्र ॥

इत्येकान्ते स्थितौ । ततः प्रविशति सुरतप्रिया

॥ सुरतप्रिया ॥

[1] धम्मो ण इट्ठो बहुदुक्खचेट्ठो
मोक्खेण सोक्खं मम अत्थि सच्चं ।
अत्थो समत्थो सअलं विधादुं
अणङ्गसव्वस्सकलाणिहाणं ॥

॥ स्नातकः ॥ उपसृत्य

[2] अज्जे विस्सणअरो तुम्हाणं अदिधी उअत्थिदो ॥

---

[1] धर्मो न इष्टो बहुदुःखचेष्टो मोक्षेण सौख्यं ममास्ति सत्यं । अर्थः समर्थः सकलं विधातु अनङ्गसर्वस्वकलानिधानं ॥

[2] आर्ये विश्वनगरो युष्माकमतिथिरुपस्थितः ॥

॥ सुरतप्रिया ॥ परिक्रम्यावलोक्य च

[1] ता उअसप्पामि । उपसृत्य । भअवं पणमामि ॥

॥ विश्वनगरः ॥ सप्रमोदं

मदभिलसितभाजनं भूयाः ॥

सुरतप्रिया

[2] भअवं तुम्हाणं पसादेण

विश्वनगरः

एवमचिरादस्तु ॥

सुरतप्रिया

[3] आणावेदु भअवं जं मए कादव्वं दाअव्वं च ॥

विश्वनगरः

शुभे किमदेयमस्माकं भवत्या । सांप्रतं भिचैव तावत् ॥

[1] तदुपसर्पामि । भगवन् प्रणमामि ।

[2] भगवन् युष्माकं प्रसादेन ।

[3] आज्ञापयतु भगवान यद् मया कर्तव्यं दातव्यं च ।

सुरतप्रिया

[1] भअवं कीदिसी भिक्खा कीदिसीए वेलाए केत्तिआइं ते अण्णाइं ॥

॥ विश्वनगरः ॥ सहर्षः

श्रूयतां ।

मांसं माषपटोलतक्रवडिकावास्तूकशाकं वटः ।
संजीवन्यथ मत्स्यमुद्गविदलप्रायः प्रकारोत्करः ।
स्वादिष्टं च पयो घृतं दधि नवं रम्भाफलं शर्करा ।
संक्षेपादिति साध्यतां सुवदने भिक्षा मदीया द्रुतं ॥

॥ सुरतप्रिया ॥ विहस्य स्वगतं

[2] हं एसो महप्पा अप्पविमज्जणजोग्गो ज्जेव देववरस्स पसाएणो संपण्णो ।

[1] भगवन् कीदृशी भिक्षा कीदृश्यां बेलायां कियन्ति ते अन्नानि ।

[2] हूं एष महात्मा आत्मविसर्जनयोग्य एव देववरस्य प्रसादेन सम्पन्नः ।

प्रकाशमञ्जलिं बद्ध्वा

[1] एदं सरीरं विरहेण जुत्तं ।
पाणा तहा धम्मफलेक्कसारा ।
सव्वं तुहाअत्तं उदारकित्ति ।
का वाहिरे वत्थुणि अत्थि अत्था ।

[2] ता अन्तरघरं पविसिअ वीसमीअदु भअवं । अहं उण भिक्खापआरं करोमि ।

॥ स्नातकः ॥ सोपहासं

[3] भअवं पेक्ख पेक्ख ।

[1] इदं शरीरं विरहेण युक्तं, पाणास्तथा धर्मफलैकसाराः । सर्वं त्वदायत्तमुदारकीर्ते । का वाह्यवस्तुनि अस्ति आस्था ॥

[2] तस्मादन्तरगृहं प्रविश्य विश्राम्यतां भगवान् । अहं पुनर्भिक्षाप्रकारं करोमि ।

[3] भगवन् प्रेक्षस्व प्रेक्षस्व ॥

संस्कृतमाश्रित्य

पक्वाः कुन्तलराजयः कटकटाक्षामौ कपोलावुभाव्
एतस्याः स्तनमण्डलं निपतितं शुष्का नितम्बस्थली ।
दृक्पातस्मितभाषितैः शिव शिव प्रस्तौति नेत्रोत्सवं
किं ब्रूमः करवाम वेति किमियं दुष्टा जरत्तापसी ॥

विश्वनगरः

धिङ् मूर्ख किमसाधुजनोचितं प्रलपसि ॥

सुरतप्रियां प्रति

शुभे गम्यतां पाकशालां प्रति । वयमप्यागच्छन्त एवास्महे ॥

सुरतप्रिया

[1] ज भअवं आणवेदि ॥

इति निष्क्रान्ता ॥

स्नातकः

[2] भअवं जाव भिक्खा सिज्झदि ताव एत्थ ज्जेव भअवं

[1] यद्भगवानाज्ञापयति ।

[2] भगवन् यावद्भिक्षा सिध्यति तावदत्रैव भगवान् तिष्ठतु । अहं पुनरनङ्गसेनिकायाः प्रवृत्तिं ज्ञात्वा लघु आगच्छामि ॥

टिट्ठदु । अहं उण अणङ्गसेणिआए पउत्ति जाणिअ लहुं आअच्छामि ॥

विश्वनगरः

वत्स सहैव गम्यतां ॥

इत्युभौ परिक्रामतः

॥ स्नातकः ॥

भअवं[1] मूलणासअणाविदस्स गेहसण्णिहाणे अणङ्गसेणाए वासभवणं त्ति मए सुदं । ता तस्स ज्जेव अणुसारेण अण्णेसम्ह ॥

अग्रतोऽवलोक्य

भअवं पेक्ख पेक्ख । एसा अणङ्गसेणा सुरविलासिणी विअ विलोईअदि ॥

विश्वनगरः

तदागच्छाग्रतः । एनामुपसर्पाव ॥

---

[1] भगवन् मूलनाशकनापितस्य गेहसंनिधाने अनङ्गसेनाया वासभवनं । इति मया श्रुतं । तस्मात् तस्यैवानुसारेणान्वेषामहै ॥ भगवन् प्रेक्षस्व प्रेक्षस्व । एषानङ्गसेना सुरविलासिनीव विलोक्यते ॥

इत्येकान्ते स्थितौ । ततः प्रविशति अनङ्गसेना।

॥ स्नातकः ॥ सहसोपसृत्य

भअव पेक्ख पेक्ख अणङ्गसेणाए लावण्णलच्छि।[1]
णीलम्भोरुहपत्तकन्तणअणा संपुण्णचन्द्राणणा।
उत्तुङ्गत्थणभारभङ्गुरतणू वेइव्व मज्झे किसा।
बाला मत्तगइन्दमन्दगमणा सुन्देरसोहामई।
णूणं पंचसरस्स मोहणलआ सिङ्गारसञ्जीवणी॥

विश्वनगरः ॥ स्वागतं ॥

यन्नेत्राञ्जनभङ्गिलङ्गिममयस्मेराननाम्भोरुहा
यत् साकूतकलाविलासवमतिर्यत् कान्तरोमोद्गमा।
मद्भावेङ्गितसंगतिं तनुलतामालोक्य गोपायति
प्रायस्तत् कथयत्यनङ्गरचनामङ्कं कृशाङ्गी स्थितां॥

---

[1]भगवन् प्रेक्षस्व प्रेक्षस्वानङ्गसेनाया लावण्यलक्ष्मीं। नीलाम्भोरुहपत्रकान्तनयना सम्पूर्णचन्द्रानना। उत्तुङ्गस्तनभारभङ्गुरतनुर्वेदिरिव मध्ये कृशा। बाला मत्तगजेन्द्रमन्दगमना सौन्दर्यशोभामयी। नूनं पञ्चशरस्य मोहनलता शृङ्गारसंजीवनी॥

प्रकाशं

सम्यगुपलक्षितं । तथा हि

यत् तीर्थाम्बु मुखाम्बुजामवरसो नेत्रे नवेन्दीवरे
दन्तश्रेणिनखास्तताक्षतचयो दूर्वा च रोमावली ।
उत्तुङ्गं च कुचद्वयं फलयुगं पत्रं कराम्भोरुहं
तन्मन्ये मदनार्चनाहितमतिः स्वाङ्गोपहारैरियं ॥

अनङ्गसेनां लक्षीकृत्य

यत् पूर्वं रचितं तपः प्रतिदिन या तीर्थयात्रा कृता
यद्भूम्ना पुरुषोत्तमार्चनविधौ चेतः कृतार्थीकृत ।
तस्यैतत् परमप्रमोदजनकं प्राप्तं फलं कर्मणस्
तत् किं शास्त्रकथारसेन किमहो स्वर्गेण मोक्षेण वा ॥

इति कामावस्थां नाटयति

॥ स्नातकः ॥ सहर्षवैराग्यं स्वगतं

[1] एसो लम्पडो उन्दुरुविअरे सप्पो विअ पइट्ठो । भोदु । जुत्तिपहाणेहिं वअणेहिं णिवारइस्सं ॥

[1] एष लम्पट उन्दुरुविवरे सर्प इव प्रविष्टः । भवतु युक्तिप्रधानैर्वचनैर्निवारयिष्यामि ॥ भगवन् त्वमुपेक्षितसंसारसौख्यो मोक्षैकपरायणः कथं एतादृशे मृगतृष्णासदृशे मदनरसे पतित्वा आत्मानं व्यापादयसि । निवर्त्यतां अस्माद् दुष्टगणिकाप्रसङ्गादिति ॥

प्रकाशं

भगवं तुमं उपेक्खिदसंसारसोक्खो मोक्खेक्कपराअणो कधं एआरिसे मअतिण्हासरिसे मअणरसे पलिअ अप्पाअणं वावादेसि । णिअत्तीअदु इमादो दुट्ठगणिआषसंगादो त्ति ॥

॥ विश्वनगरः ॥ सावज्ञं

वत्स नैवं पश्यसि

याबद्दृष्टिर्मृगाक्षीणां न नर्गीनर्ति भङ्गुरा ।
तावज्ज्ञानवतां चित्ते बिवेकः कुरुते पदं ॥

॥ अनङ्गसेना ॥ विहस्य

[1] भअवं धणाधीणो क्खु अअं जणो । एत्थ अरण्णरुदिअं कदुअ अप्पाणअं विडम्बेसि ॥

---

[1] भगवन् धनाधीनः खलु अयं जनः । अत्र अरण्यरुदितं कृत्वात्मानं विडम्बयसि ॥

विश्वनगरः

सन्यासिनामस्माकं कुतोऽर्थसंपत्तिः । तदस्मच्छरीरेण यथासुखं बिनियोगः क्रियतां ।

सानुरागं

बाले मृणालदलकोमलबाहुदण्डे
चण्डि प्रचण्डवदने मयि देहि दृष्टिं ।
एष त्वदीयवदनाम्बुजकृष्टचेता
दीनो यतिः झपदि मज्जति कामसिन्धौ ।।

स्नातकः

भो भअवं तुमं उपेक्खिवदसंसारसोक्खो

इत्यादि पठति

।। अनङ्गसेना ।। संस्कृतमाश्रित्य

भगवन्नलमत्रात्यन्तानुसंधानेन ।

वागर्थं परिगृह्य मोक्षपदवीं ध्यायन्ति निर्मत्सराः
शान्तप्रौढ़कुलीनहीनविषये सर्वत्र साधारणाः ।

रागद्वेषममत्वकर्षितधियो वेश्याः सुरा भिक्षवो ।
वस्तुं नन्वपि नित्यमित्यहह किं कामार्णवे मज्जसि ॥

विश्वनगरः

प्रिये गृहाणास्मच्छरीरं ॥

इत्यञ्चले धारयति

॥ स्नातकः ॥ सहसोपसृत्य

[1] अरे णट्ठपरलोआ दुट्ठपरिव्वाअआ एसा पठमं अह्मपरिग्गहेण तुह पुत्तबहू होदि । ता मुञ्च एणं ।

विश्वनगरः

धिङ् मूर्ख एषास्मद्वधूस्त्वद्गुरुपत्नी मातृतुल्या च । तत् किमेनामनुबध्नासि ॥

॥ स्नातकः ॥ सक्रोधं

[2] अरे रे लम्पडा एवं एवं भणन्तस्स दण्डप्पहारेण पक्कमालूरफलं विअ मुण्डं दे थत्थरं करइस्सं ॥

[1] अरे नष्टपरलोक दुष्टपरिव्राजक एषा प्रथममस्मत्परिग्रहेण तव पुत्रवधूर्भवति । तस्माद् मुञ्चैना ॥

[2] अरे रे लम्पट एवं एव भणतो दंडप्रहारेण पक्वमालूरफलमिव मुण्डं तव खंडशः करिष्यामि ॥

इत्यन्योन्यं कलहं कुरुतः

॥ अनङ्गसेना ॥ स्वगतं

[1] कधं धुत्तहत्थपलिदह्मि। भोदु एवं ताव ॥

प्रकाशं

भो महाभाअधेआ तुम्हाणं एआरिसे महाविवादे असज्जाइ-मिस्सो पमाणीकरीअदु ॥

विश्वनगरः

प्रिये भवतु ॥

स्नातकः

[2] पिए दसटङ्कआ मए दादव्वा। ता तं गेण्हिअ मह मणोहरं संपादेहि ॥

---

[1] कथ धूर्तहस्तपतितास्मि। भवतु एवं तावत्। भो महाभागधेयौ युष्माकमेतादृशे महाविवादे असज्जातिमिश्रः प्रमाणीक्रियतां ॥

[2] प्रिये दशटङ्कका मया दातव्याः। तस्मात् तद् गृहीत्वा मम मनोहरं संपादय।

इति ग्रन्थिं दर्शयति

॥ विश्वनगरः ॥

अलं ग्रन्थिदर्शनेन । आगच्छतं । तत्रैव गच्छामः ॥

इति निष्क्रान्ताः सर्वे ॥

इति प्रथमाहः संधिः ॥

द्वितीयोङ्कः

ततः प्रविशति असज्जातिमिश्रो विदूषकश्च

॥ असज्जातिमिश्रः ॥

सप्रमोदनं

त्रैलोक्ये भोजनं श्रेष्ठं ततोऽपि सुरतोत्सवः ।
भोजनं वास्तु वा नास्तु जीवनं सुरतं विना ॥

वत्स बन्धुवंचक आगच्छाधीष्व ॥

विदूषकः

[1] ज मिस्सो आणवेदि ॥

असज्जातिमिश्रः

यद्वामावक्त्रपानं यदलसनयनालोकनं केलिरङ्गे
यः स्यादप्यङ्गसङ्गः कुचकलससमुत्पीडने वाहुभङ्गिः ।
एतत् संसारसारं कुरु निजहृदये निर्विकल्पैककल्पं
किं ते कार्यं विवादव्यथितऋजुमतिग्रन्थकन्थाभरेण ।

[1] यद् मिश्र आज्ञापयति ।

॥ विदूषकः ॥

[1] भो मिस्स पराङ्गणासंभोगादो पि परमन्दिरे संधिं कदुअ जं अत्थो अबहरीअदि तं ज्जेव तिहुअणसारं। पेक्ख पेक्ख ॥

किं वाणिज्जेण कज्जं णिअधणविलअं तं क्खु काऊण दुक्खं
किंवा कज्जं किसीए पसुवसुणिअमाआसणिक्कज्जदाए।
किं विज्जाए फलं वा मरणसमसमुप्पण्णचिन्ताउलाए
एक्कं तेल्लोअसारं परधणहरणं जूअकीलासुहं च ॥

ता एत्थ धुत्तउरणअरे जादिसो तुमं गुरू तादिसो अहं सिस्सो संवुत्तो ॥

॥ असज्जातिमिश्रः ॥

अहो अस्मिन् नगरे निरुपधिजीवनतास्मद्विधश्रोत्रियाणां।

---

[1] भो मिश्र पराङ्गनासंभोगादपि परमन्दिरे संधिं कृत्वा यदर्थोपह्रियते तदेव त्रिभुवनसारं। प्रेक्षस्व प्रेक्षस्व। किं वाणिज्येन कार्यं निजधनविलयं तं खलु कृत्वा दुःखं किं वा कार्यं कृष्या पशुवसुनियमायासनिष्कार्यतया। किं विद्यायाः फलं वा मरणश्रमसमुत्पन्नचिन्ताकुलायाः एकं त्रैलोक्यसारं परधनहरणं द्यूत-क्रीडासुखं च ॥ तदत्र धूर्तपुरनगरे यादृशस्त्वं गुरुस्तादृशोऽहं शिष्यः संवृत्तः ॥

दिनाष्टतयादारभ्य न कश्चिन्न्यायवादी न कपटश्राद्धप्रतिलम्भा न च गणिकालापः ॥

नेपथ्ये

विज्ञाप्यतां मिश्रस्य स्थाने न्यायकरणार्थं वादिनौ द्वारि वर्तेते ॥

॥ असज्जातिमिश्रः ॥

वत्स बन्धुवंचक प्रवेशय वादिनौ

विदूषको निष्क्रम्य विश्वनगरस्नातकानङ्गसेनाभ्यां सह पुनः प्रविशति ।

असज्जातिमिश्रः ॥ विश्वनगरस्नातको निगाद्य स्वगतं

कथमनर्थान्तरमापतितं ॥

प्रकाशं

भगवन्नागन्तुका वयं । तन्नात्र भिक्षावसरः ।

॥ विदूषकः ॥

[1] भो मिस्स एदं ज्जेव वादिणा । एदाणं विवादं विचारेदु मिस्सो ॥

[1] भो मिश्र एतावेव वादिनौ । एतयोर्विवादं विचारयतु मिश्रः ॥

॥ असज्जातिमिश्रः ॥ सहर्षं सगौरवं च

आसनमुपनीयतां भगवते स्नातकाय च ॥

विदूषकस्तथा कृत्वा सर्वान् उपवेशयति

॥ असज्जातिमिश्रः ॥

कोऽर्थी कः प्रत्यर्थी ॥

स्नातकः

[1] भासाए अह अत्थी णिअरकरणे भअवं ॥

असज्जातिमिश्रः

न्यायवादिनः प्रथमतो निकरः पश्चाद्भाषोत्तरे ॥

विश्वनगरः

अयमस्मत्संन्यासदण्डो निकरः ॥

स्नातकः

[2] एदं मे इन्दासणकोल्लिअं णिअरकरणपविणीअदु ॥

---

[1] भाषायामहमर्थी निकरकरणे भगवान् ।

[2] इदं मे इन्द्राशनकौलिकं निकरकरणे प्रविनीयतां ।

॥ असज्जातिमिश्रः ॥ सगौरवं गृहीत्वा सप्रमोदमाघ्रय किंचिद्विनियुज्यते

निद्राकरं दोषबिनाशहेतु
क्षुधाकरं बुद्धिविकाशकं च।
इन्द्राशनं कामबलानुकूलं
लब्धं मया दैववशादिदानीं॥

विश्वनगरः

स्वाधीनयौवना सुभ्रूः मा मान्या सर्वकामिनां।
अस्माभिरियमाक्रान्ता मदीया तेन वल्लभा॥

॥ असज्जातिमिश्रः ॥ भाषां भूमौ लिखित्वा स्नातकं प्रति स्नातक सत्वरमुत्तरं कुरु ॥

स्नातकः

[1] एसा पुव्व मए दिट्ठा दाऊण दमटङ्कआ।
आणीदा अ मदिं दाइं मदीआ तेन वल्लहा॥

[1] एषा पूर्वं मया दृष्टा दत्वा दराटङ्ककान। आनीता च मति दयिता मदीया तेन वल्लभा॥

स्वप्नेपि पूर्वं मयि ज्ञातकेलि
स्ततोपि हेतोः खलु वल्लभा मे ॥

॥ विदूषकः ॥ अनङ्गसेनामालोक्य जनान्तिकं

[1] भो सुन्दरि एसो मिस्सो वुद्धो भअवं णिद्धणो सिणादओ इछारअणो । ता एदाण समागमं परिहरिअ अम्हसमागमेण तुह जोव्वणं सफलं भोदु ॥

इत्यात्मानं दर्शयति

॥ अनङ्गसेना ॥ सस्मितं

[2] एदं धुत्तसमागमपहसणं संवुत्तं ॥

॥ विश्वनगरः ॥ सवैराग्यं

वत्स दुराचार न हि जलौकसामङ्गे जलौका लगति । मूलनाशकस्यायं विचारः । तदेहि सुरतप्रियया एव भवनं गच्छाव ॥

---

[1] भो सुन्दरि एष मिश्रो वृद्धो भगवान् निर्धनः स्नातक इच्छारचनः । तस्मादेतेषां समागमं परिहृत्य अस्मत्समागमेन तव यौवनं सफलं भवतु ।

[2] एतत् धूर्तसमागमप्रहसनं संवृत्तं ॥

इति निष्क्रान्तौ । ततः प्रविशति अपटीक्षेपेण मूलनाशकः

॥ मूलनाशकः ॥

[1] अले अले अणङ्गशेणिए जाणिदे तुम्ह चलिदं जं वालं वालं कअमअणमन्दिलक्खोलबेदगं पत्थन्ते बहुवालं हग्गे तए पआशिदे । ता शंपदं पअच्छ । अण्णधा लाअदोहाइं दाव दाइश्शं ॥

अनङ्गसेना

[2] मूलनासअ सपदं ज्जेव असज्जाइमिस्साइं तुह दाइस्सं । ता सुत्थो होहि ॥

विदूषकः

[3] को एसो दुट्ठदसणो दुट्ठचरिदो दुट्ठवअणो ॥

[1] अरे अरे अनंगसेनिके ज्ञातं तव चरितं यद् वारं वारं कृतमदनमन्दिरक्षौरवेतनं प्रार्थयन् बहुवारमहं त्वया प्रकाशितः ॥ तस्मात् सांप्रतं प्रयच्छ । अन्यथा राजद्रोहाणि तव दास्यामि ॥

[2] मूलनाशक सांप्रतमेव असज्जातिमिश्रान् तव दास्यामि । तस्मात् सुस्थो भव ॥

[3] क एष दुष्टदर्शनो दुष्टचरितो दुष्टवचनः ॥

असज्जातिमिश्रः

एष किं भगवदगोचरः । पश्य

छिन्नौष्ठनासो गलगण्डनम्रो
वामाक्षिकाणो गलितैकहस्तः ।
शिलीपदव्यापृतदक्षिणाङ्घ्रिः
स मूलनाशः किल नापितोऽसौ ॥

मूलनाशकः सहसोपसृत्य सर्वेषां सप्रमाणमादर्शं दर्शयति

असज्जातिमिश्रः

मूलनाशक क्रियतामस्माकं नखलोम्नां परिष्कारः ॥

मूलनाशकः

[1] पठमं वेदनं पअच्छ ॥

असज्जातिमिश्रः

मूलनाशक किमर्थं ॥

मूलनाशकः

[2] भो जदि तुमं पलिक्खलन्ते पठमं ज्जेव मलिश्शशि ता वेदनं किण पइच्छिदव्वं ॥

[1] प्रथमं वेतनं प्रयच्छ ।

[2] भो यदि त्वं परिस्खलन् प्रथम मरिष्यसि तदा वेतनं केन प्रयन्तव्यं ॥

असज्जातिमिश्रः

अलं परिहासेन। गृह्यतामिदं पारितोषिकं ॥

इति कौलिकादाकृष्य गुञ्जाकिनीं ददाति। मूलनाशकः सगौरवं गृहीत्वा सप्रमोदं आघ्राय किंचिद्विनियुज्य च मिश्रस्य करचरणयोर्बन्धनं कृत्वा व्यापारं नाटयति

॥ असज्जातिमिश्रः ॥ सवेदनं

दलति हृदयमेतन्मोहमभ्येति चेतः
स्फुटति सकलदेहे कीकसग्रन्थिसंधिः।
विरम विरम शिल्पान्मूलनाश त्वमस्मात्
शिव शिव शिव सद्यो जीवनं कुप्यतीव ॥

इति मोहमुपगतः

॥ मूलनाशकः ॥ चालयित्वा

[1] कधं मलिदे अशज्जाइमिश्शे लहू लहू अवकमिश्शं ॥

इति निष्क्रान्तः

---

[1] कथं मृतोऽसज्जातिमिश्रः। लघु लघु अपक्रमिष्यामि ॥

॥ विदूषकः ॥ मिश्रस्य करचरणयोर्बन्धनमपनीय

[1] भोआणवेदु मिस्सोअवरं क्खु तुह पिअं णिव्वाहइस्सं ॥

॥ असज्जातिमिश्रः ॥ संज्ञां लब्ध्वा

राष्ट्रं समस्तं कपटेन भुक्तं
धूर्त्तक्रियाभिर्दयितयमाप्ता
भवान् विनीतो मिलितश्च शिष्यः ।
नातः परं नः प्रियमस्ति लोके ॥

तथापीदमस्तु ।

काले संततवर्षिणो जलमुचः शस्यैः समृद्धा धरा ।
भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः ।
स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः ।
सन्तः शान्तिपरा भवन्तु कृतिनः सौजन्यभाजो जनाः

इति निष्क्रान्ताः सर्वे

इति श्रीकविशेखराचार्यज्योतिरीश्वरविरचितं धूर्तसमागमं नाम प्रहसनं समाप्तं ॥

---

[1] भो आज्ञापयतु मिश्रः । अपरं खलु तव प्रियं निर्वाहयिष्यामि ॥

Of course, many words could not be construed and are printed here as I had read them, with or without my suggestions within brackets. (I have adopted within braekets a question mark[1] *before* a letter or a word when I am doubtful of reading it correctly in the Ms. and *after* it when I am not doubtful of my reading but suggest a possible correction in spelling)

In editing old Maithili texts a most difficult problem is the separating of words (पदच्छेद) and lines, sentences and paragraphs. I have tried to use my discretion as carefully as I could. Besides these, the dramatic structure of the present text has made it necessary for me to change the types and to separate the speeches from the names of the speakers. I have used smaller types (usually within brackets[2]) to indicate the stage-directions, which need not be spoken on the stage when the play is produced.

The old Maithili Mss. have the ordinary Sanskrit punctuation marks – the single and the double lines. But a unique feature is the dot, resembling the Roman full-stop: only it is not placed at the bottom of the line but in the middle of it. It is usually given before the Sanskrit *virama*

---

1. A mere question mark within brackets indicates my complete inability to follow the letter or the word. Whenever a letter is deciphered but not read, I have put a cross and whenever even this is doubtful a series of dots.

2. The brackets are also given to indicate some letter or words that are obviously omitted or missed or incorrectly written by the copyist. Note, however, that the words अपिच printed in smaller types are meant to be spoken.

and is omitted frequently after a *visarga*. It is found in this work also and I have faithfully preserved it. There is, however, a peculiar sign on page 23 before हरसिंह similar to the sign on page [8-Kha] in the Ms. of Vidyapati's *Goraksavijaya*.[1] It seems to have been a half-obliterated *va* or *ra*, marked on the top as struck off by two small vertical lines. These two small marks on the top of a letter or a matra indicating that it is struck off are found in this Ms. also and have been noticed by me in the footnotes. This way of striking off a letter is very decent : it does not spoil the neatness and beauty of a Ms.

The appearance of the Ms. is very old and the errors in Sanskrit or Prakrit passages are very insignificant. Pages 1 to 12 are missing in the beginning and it ends abruptly on page 25, perhaps one leaf i.e. two pages are missing at the end.

I have given the full Sanskrit version of the play in the appendix from Lassen's edition, lent to me very kindly by the National Library of Calcutta, so that the Maithili version may be understood in relation to the full play.

2. The Author and His Patron

The author of this play is well-known. Indeed, we have known him as the earliest Maithili writer. The present work is the first example to show that Kavishekhara Jyotirishvara besides being a prose writer was also a poet of Maithili. The

1. Published by the All India Maithili Sahitya Samiti, Allahabad.

importance, hence, of this play lies in the specimens of the earliest extant Maithili poetry. Unfortunately there is very little scope of revealing any poetic qualities in the songs of this drama but the mastery of the language, the chaste diction and the elegant handling of metre are evidences of the gifted talents of the author. The author is evidently proud of his title Kavi-shekharacarya for he mentions it invariably with his name, which is nowhere given in full. 'Jotika'is perhaps the abbreviated form that could be fitted into a poem. But theidentity of 'Jotika' with 'Jyotirishvara' the author of the Sanskrit works *Dhurttasamagama* (farce), *Pancasayaka* (a work on erotics), and *Ranga-shekhara* and the Maithili prose work of poetic conventions *Varnaratnakara* is certain, not only because this is another version of his Sanskrit play but also because he mentions the same patron's name.

The importanee of the present find is also great so far as the patron of Jyotirishvara is concerned. It settles once for all the oontroversy : if the name is Harisimha or Harasimha. Everywhere in this text it is mentioned as *Harasimha.*[1] So also the controversy raised about Narasimha being his patron seems to be futile now, though I stick to the possible interpretation of the name Narasimha occurring in some Mss. as Narasimha II which I offered in *A History of Maithili Literature* (Vol. I, p. 120). Indeed, my conjecture finds a support in the present Ms. as one of the sons of Minister Ganeshvara (mentioned in the songs here) is known to have flourished under Narasinha II. (See *Ibid.* p. 137).

---

1. Cf. the phrase 'हरो वा हरसिंहो वा' in Vidyapati's *Purusapariksa.*

Of greater value is the reference here to Minister Ganeshvara, the elder brother of Vidyapati's grandfather.[1] The relevant Bhanitas are given below :

हसइ सिरि गणेसर मन्ति ।
हरि पय भगत गणेसर जान रे आ ॥१३॥
सुनिअ मन्ति गणेश हासा ॥१६॥
महामन्ति जीवतु गणेस रे
बीस तीस भणे कवि ॥१७॥

It is clear that this Minister (obviously Minister of the contemporary ruler Harisamhadeva mentioned in other poems) was quite close to this poet, was a devotee of Hari[2] (Lord Krishna and not Harisimhadeva), and was complimented to live long (बीस तीस may mean 30+20=50 years more). I have come to the conclusion from the terms in which Ganeshvara is mentioned that Jyotirishvara was not related to Ganeshvara (as uncle). Moreover, Jyotirshvara belonged to Palli family and Ganeshvara to Bisphi family. This finally sets at rest the surmise that Jyotirishvara was a brother of Vidyapati's grandfather. All that seems probable is that Jyotirishvara was familiar with Vidyapati's ancestors, and that perhaps he frequented along with them the courts of Harasimhadeva and Narasimhadeva II.

1. Of course, there is one other Ganeshvara not a minister but Maharaja Ganeshvarasingh, a contemporary of Vidyapati's father. But I do not think it proper to identify Jyotirishvara's patron with Maharaja Ganeshvarasingh. The poet markedly distinguishes between राय and मन्ति titles throughout this book.

2 Note that Vidyapati's ancestor Ganeshvara called one of his sons as Govinda who wrote a work called *Govinda Manasollasa*, a devotional work on Vishnu.

I do not think I can say here anything else that is not contained in the learned account of Jyotirishvara and his patron that is given by Dr. Suniti Kumar Chatterji in the introduction to *Varna-Ratnakara* (published by the Royal Asiatic Society of Bengal as work No. 262 of the Bibliotheca Indica).

Thus, this work is the oldest vernacular work in Northern India as it belongs to the first quarter of the 14th Century A. D.

3. The Play

The play is a farce. Its story is slender but fortunately the extant portion gives the interesting portions of the plot in full.

The play opens with one Sanyasi called Vishvanagra who is really a fraudulent knave. He has a disciple called Snataka. The two first approach a wealt ıy miser called Mritangara Thakur who refuses to give them any food on some false pretext. They rebuke him but he refers them to the house of a pious lady called Surata.apiyr

Now the preceptor Vishvanagar had seen this lady and had fallen in love with her. So he is happy to go to her place : she is also a great fraud—she desires to have this good-looking Sanyasi as her lover. So she is willing to do everything to please him. He asks her to cook a number of things for midday meals.

While the food is being cooked the disciple Snataka expresses his desire to find out a courtesan of the town called Anangasena with whom he has fallen in love. Vishvanagara also goes with him and having found her, both of them fall out. The courtesan is much perturbed and commends one Asajjati Mishra as the arbitrator. Here ends the first Act.

In the second Act Asajjati Mishra is the hero. He is an old Shortriya Brahmana but a thorough fraud. He has a Vidushaka friend called Bandhuvancaka. While pretending to decide who should possess Anangasena—Vishvanagara or his disciple Snataka who has shown her a sum of Rs. 10 tied in a corner of his clothes—he himself falls in love with the lady and takes her away from both. The two go away disappointed. The lady rightly says—verily here is a meeting of knaves (धूर्तसमागम).

Here begins what I consider to be the third Act, but is not marked off by the author as such. A barber who is a neighbour of the courtesan appears on the scene and wants to get payment for shaving her private parts. The lady says that he will have the money from Asajjati Mishra.

Asajjati gives him a little *ganja* (country intoxicant) in lieu of payment, which he himself had received from Snataka for arbitrating the real owner of Anangasena.

The barber ties the hands and feet of Asajjati and leaving him unconscious goes away. Then comes his friend Vidushaka to release him.

This is briefly the story. It is a typical *prahasana* (farce),

fulfilling almost every condition prescribed in Sanskrit literary criticism. It is to be classed as Shuddha Prahasana as there are many characters here, two of them being heroes who are a knave Bhagwat (Sanyasi) and a Shrotriya, assisted by rogues of the lower class such as the barber and the prostitute. It has two Acts. The laughter aroused is of a lower kind - from the very names of the people (World-City is the name of the hero; Low-Caste is the name of the Shrotriya ; Sexual-Intercourse-Lover is the name of the pious old lady who keeps a fast for one month; and so on); from the strange diction and foolish words or absurd *pralapa*, descriptions or ridiculous situations; from mockery, irony and joke.

Its importance as a drama lies in the introduction of Maithili songs. We have an indication that at least twenty Maithili songs had been inserted in it but eight of them are missing in the extant text. The songs are like the songs of early Kirtaniya drama—entrance songs, descriptive songs and frequently mere translations of the Sanskrit verses. There is hardly much poetic beauty in them—they are interesting and significant not in themselves but in the total development of the play. In this sense they are truly dramatic pieces. The mastery over rhythm and chaste Maithili diction are, however, remarkable. There is obvious influence of Jayadeva's *Gitagovinda* on these songs—indeed, one of them is a complete imitation of its style. Like the *Caryapadas* and more like the later Maithili Padas they mention Raga and Tala and the names of the patron and the author.

So far as the language is concerned it is certainly archaic (cf. the forms न लइ वसु, एखने हमर गमन, भञ्, चिन्तहि, बन्धि, चाँदन, वेन्दा लाइ, सनिञ, सांजवि, कहञ, छाड़सि; सोति बोलाइ, सबहि चाहि, परके

पाणिय गारी, श्रवलोकलि, कुमान्ति etc.) but it is not like that of the *Varna-Ratnakara* Indeed, its language has similarities with that of Vidyapati. It must be admitted, however, that in many ways it is surprising to find the Maithili of this work similar to modern Maithili --I do not for this reason doubt the genuineness of the find : it is the poetic use of the language which requires fewer forms of it and the general philogloical history of the Maithili language which explain this characteristic.

Finally like the *Varna-Ratnakara* this play has an importance for the 14th century social history of Mithila. It tells us something about the castes, the food, the habits and the practice of law in those days. In particular I should like to draw the attention of the interested scholars to the song on pages 5 and 6 describing food which is peculiarly Maithila to this day.

On the whole, I am convinced that Maithili literature--nay, the vernacular literature of Northern India—has been enriched by the discovery of this work.

आमुख

'कविशेषर जोतिक भासा' हमरासभक हेतु नव नहि थिक तथापि ओकर जे रूप आइ एहि ग्रन्थद्वारा पाठकक समक्ष राखल अछि तकर हमरासभकेँ गौरव अछि। एतेक प्राचीन समयमे (१३२४ इस्वीक लगभग) मैथिली-भाषाक कतेक सुदृढ़ ओ परिमार्जित साहित्यिक स्वरूप छल तकर प्रमाण एहि ग्रन्थमे भेटैछ। 'वर्णरत्नाकर'क भाषा ओ मैथिली धूर्त्तसमागमक भाषामे बड़ अन्तर छैक—एहिमे अपभ्रंशक अंश नहि छैक ओ विद्यापतिक काव्यमे जेहन भाषा अछि तेहने एहिमे भाषा अछि।

आशा करैत छी जे नवीन अनुसन्धानसँ ने केवल एहि ग्रन्थक पूर्ति होएब सम्भव छैक अपितु आनो आनो रत्न भेटत।

हमरा एहि ग्रन्थकेँ पढ़बामे बड़ परिश्रम ओ समय लागल से आइ एकर मुद्रणसँ सफल भेल।

श्रीजयकान्तमिश्र